International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(2): 210-212
© 2026 IJMH
www.themultijournal.com
Received: 18-03-2026
Accepted: 06-04-2026
Publish : 07-04-2026

**डॉ. विष्णुप्रिया जेना**
अध्यापिका,संस्कृत

**Correspondence:**
**डॉ. विष्णुप्रिया जेना**
अध्यापिका,संस्कृत

# शैक्षिकप्रविधिः चारित्रिकनिर्माणञ्च

**डॉ. विष्णुप्रिया जेना**

**शोधसारः**

अधुना आधुनिकमानवसमाजे सांस्कृतिकावक्षयवशात् शिक्षितमानवाः पथभ्रष्टाः भवन्ति। पाश्चात्य-संस्कृतिमनुसृत्य भारतीयसंस्कृतिं प्रति अवमाननां कुर्वन्ति। विद्यालय-महाविद्यालयादिषु प्रवेशानन्तरं वहवः छात्राः यथार्थशिक्षाग्रहणं अनादृत्यप्रविधिभिः असामाजिककार्येषु लिप्ताः भवन्ति इति साधारणविषयं केन्द्रीयकृत्य समाधानसूत्रं न विचिन्त्य राजनैतिकचापेन वशीभूताः सन्तः धर्मघटादिमाध्यमेन जातीयसम्पत्तेः विनाशं कुर्वन्ति। अधुना राष्ट्रस्य सकलस्तरेखषु दुर्नीतिः परिव्याप्ता। शिक्षानुष्ठानानि अपि संपृक्तानि सन्ति इति । प्राक्काले एतानि ज्ञानस्य मन्दिराणि आसन्। वाग्देव्याः पीठस्थलानि चासन्। इदानीम् अर्थमाध्यमेन प्रश्नपत्राणि प्राप्यन्ते इति। असदुपायेन स्थानसं-रक्षणादिकार्याणि अपि सम्भवन्ति। फलतः छात्रसमाजस्योपरि कुप्रभावः पतति। अतैव प्रचलित-शिक्षाप्रविद्धिः त्रुटिपूर्णा अनुभूयते इति।

**शैक्षिकप्रविधिः**

अखिलेऽस्मिन् ब्रह्माण्डे वैदिककालादद्यावधि समेषां मानवानामाध्यात्मिक-चारित्रिक-बौद्धिक-सामाजिक विकासमुन्नेतुं प्रकाशमानञ्च कर्तुं प्रभवति शिक्षा। शिक्षका गतिशीला विकासप्रक्रिया वर्तते। यया शिक्षया मानवः मानवत्वं प्राप्नोति। शिक्षादर्पणमिव कार्यं सम्पादयति, यथा दर्पणमवलोक्य मानवः स्वीयं वास्तविकं स्वरूपं वेत्ति तथैव शिक्षया मानवः स्वास्तित्त्वबोधं कर्तुं प्रभवति । एवञ्च शिक्षया एव मानवः सभ्यतां, सुशीलतां, व्यवहारम्, आहारं, ज्ञानविज्ञानं, कर्माकर्म, धर्माधर्म, सत्यसत्यं, विद्यामविद्यां च वेत्ति। उक्तञ्च-

**सत्याचार-विचारशिक्षणपरा सर्वाङ्गिकीमुन्नतिं**
**छात्राणां विदधद् विवेक-विनयाचार-प्रचारैकधीः ।**
**चारित्र्योन्नतिसाधिका गुणगणैः सारल्यसंसाधिका ।**
**लोकेषु प्रचरेत् सुशिष्यजनिदा शिक्षा सदा कामधुक्।।[1] (कपिलस्य)**

**शैक्षिकप्रविधेः विद्यार्थी**

भारतीयज्ञानपरम्परायां शिक्षाक्षेत्रे नैतिकशिक्षायाः मुख्यस्थानमासीत्। प्राचीनकाले अनया शिक्षया नीतिवोधजागरणस्योपरि विशेषगुरुत्वमासीत्। प्राचीनभारतस्य ऋषिमुनयः वेदोपनिषद्संहितापुराण-शास्त्रादिमाध्यमेन नीतिशिक्षां प्रदत्तवन्तः। यद्वारा प्राचीनभारतीयशिक्षार्थी "परोपकाराय स्वर्गाय" इति मन्त्रेण दीक्षितः सन् पीडितजनानामुपकाराय व्रती आसीत्। तत् यथा-

**"परोपकाराय फलन्ति वृक्षाः परोपकाराय वहन्ति नद्यः।**
**परोपकाराय दुहन्ति गावः परोपकारार्थमिदं शरीरम्।।"[2]**

वृक्ष-नदी-गो-उदाहरणानि उद्धृत्य प्रकृते सर्वं परेषां कृते विद्यते, मानवशरीरम् अपि निःस्वार्थसेवायै अभिप्रेतम् इति व्याख्यायते । भारतीयसंस्कृतौ आर्यस्य स्वभावस्य वर्णनार्थं सेवा, समर्पणं, सज्जनस्य स्वभावः च उपयुज्यन्ते । यथा प्रकृतिः स्वं न भक्षयति, तथैव सद्गुणानां (सद्जनानाम्) दानं कर्तुं स्वभावः। अधुना शिक्षाक्षेत्रे परीक्षार्थिनः स्मृतिशक्तिविषये परीक्षायां सफलताविषये च महत्वं दीयते। एतादृशी शिक्षानीतिः जातीयस्तरेण आवश्यकतानुसारं सम्पूर्णतया अनुकूलात्मिका न भवति। परीक्षा परिचालानायां मूल्यायनक्षेत्रे च अनेकाः त्रुटिविच्युतयः परिदृश्यन्ते । मेधाविछात्राः विविधक्षेत्रेषु उपेक्षिताः भवन्ति। अपरे अर्थवलमाश्रित्य असदुपायमाध्यमेन परीक्षायां सफलतां प्राप्नुवन्ति। फलस्वरुपः शिक्षायाः मानवृद्धिर्न जायते । तत् विषये कथ्यते-

**"सुखार्थिनः कुतो विद्या विद्यार्थिनः कुतो सुखम् ।**

**सुखार्थी वा त्यजेत् विद्यां विद्यार्थी वा त्यजेत् सुखम्।।"**[3]

सम्प्रतिसमाजे छात्रछात्राः सांस्कृतिकावक्षयस्य वशीभूताः भवन्ति। नग्नताहिंसाचारादियुक्तं चलचित्रं दृष्ट्वा युवछात्रछात्राः प्रभाविताः भवन्ति। तत्रैव हिंसाचार- यौनोतशृङ्खलादयोऽपि परिदृश्यन्ते। तत् यथा-

**"अहिंसा परमो धर्मः धर्म हिंसा तथैव च।**
**अहिंसा परमं धाम, सर्वभूतानाम् हितं तथा।।"**[4]

उपयुक्तशिक्षां विना मनुष्यः पशुतुल्यः एव भवति । यथार्थशिक्षा मनुष्यस्य अज्ञानतां दूरीकृत्य ज्ञानालोकं प्रकाशयति, मनसः कुसंस्कार दूरीकरोति, चेतनायारुद्रेकं च करोति । इयमेव मानवस्य यथार्थमार्गदर्शिका भवति। तस्मात् मनुष्यस्य कृते उत्तमशिक्षा प्रयोजनीया इति। परन्तु सम्प्रति विद्यालयमहाविद्यालयादिषु प्रचलितशिक्षाप्रविधिः समाजस्य कृते आवश्यकता पूरयितुमसर्था भवति। प्रविधिरियं छात्राणां शारीरिक-मानसिक- बौद्धिकविकाशादिक्षेत्रे सहायिका भवेत्। परन्तु छात्रं यथार्थमनुष्यरूपेण गठनार्थं नैतिकशिक्षायाः तथा आध्यात्मिकविकाशार्थम् आवश्यकता नितराम् अनुभूयते। प्रचलितशिक्षया यथा सम्मानप्राप्तिः तथा प्रभूतम् अर्थोपार्ज्जनं सम्भवेत् । वस्तुतः शिक्षा न केवलं जीविकार्थम् , अपितु यथार्थजीवनयापनार्थं समुद्दिष्टा । यथार्थेन उक्तम्-

**"अलसस्य कुतो विद्या अविद्यस्य कुतो धनम्।**
**अधनस्य कुतो मित्रममित्रस्य कुतः सुखम्।।"**[5]

यथार्थतया समीक्षणेन ज्ञायते यत् शिक्षायाः मुख्योद्देश्यं भवति छात्रस्य चारित्रीकनिर्माणम्। तथैव तस्यान्तर्निहितसद् गुणानामुन्मीलनमेव।किन्तु इदानीं छात्राणां कार्यकलापेन प्रचलितशिक्षायाः फलं प्रमाणितं भवति। शृङ्खला - सदाचार- चरित्रवत्ता-सत्यनिष्ठता-देशप्रेमादिगुणाः तेषां समीपे परिलक्षिताः न भवन्ति ।

**"माता शत्रुः पिता वैरी येन बालों न पाठितः।**
**न शोभते सभामध्ये हंसमध्ये बको यथा।।"**[6]

प्राचीनकालेशिक्षापद्धतिविषये समीक्षणेन ज्ञायते यत् पितरौ सन्तानानां शिक्षाप्राप्त्यार्थं गुरुकुलाश्रमं प्रेरितवन्तौ इति। तत्र सर्वेशिष्याः भौतिकज्ञानाया सह आध्यात्मिकशिक्षां प्राप्तवन्तः। अस्माकं देशस्य संस्कृति - ऐतिह्य- परम्परादिभिः सह परिचिताः अभवन् । यद्वारा शिक्षाप्राप्त्यानन्तरं ते गृहमागत्य समुदाये आदर्श जीवनयापनं कृतवन्तः। पित्रोः उपदेशमवलम्ब्य सन्तानामपिसद्चरित्रसम्पन्नाः अभवन्। फलस्वरुपः परिवारे समुदाये च सुखशान्तिं प्रतिष्ठिता आसीत्। सम्प्रति अस्माकं देशे शिक्षितजनानाम् अभावो नास्ति इति। प्रतिवर्षं सहस्राधिकाः द्राक्तराः यन्त्रिणः, प्रशासकाश्च कृतित्वेन सह समुत्तीर्ण्णः भवन्ति इति मन्यन्ते।

**"नास्ति विद्यासमो बन्धुर्नास्ति विद्यासमः सुहृत्।**
**नास्ति विद्यासमं वित्तं नास्ति विद्यासमं सुखम्।।"**[7]

किन्तु एतेषु वास्तविकमानवस्य अन्वेषणत्वेन अतीव कष्टकरं भवति। सर्वोच्चस्थानं गृहित्वा वहवः प्रतिभासम्पन्नजनाः अपि आत्मकैन्द्रिकरूपेण स्वार्थपरायणाः सन्तः राष्ट्रीयस्वार्थं परित्यजयन्ति स्म। तस्मादेव अस्माकं देशे उत्तमचरित्रसम्पन्ननागरिकाणाम् अत्यावश्यकता विद्यते स्म। समुदायस्य देशस्य च गठनार्थं विशेषतया छात्राणां भूमिका अतीवगुरुत्वपूर्णा भवति । छात्रा एव अग्रिम भविष्यतस्य उत्तमनागरिकाः सन्ति देशस्य संगठकाः रक्षकाश्च भवेयुः इति । एतदर्थं एतेषाम् उपयुक्तशिक्षां प्रति मौलिकस्तरतो दृष्टिः दातव्या इति। विद्यालये महाविद्यालये विश्वविद्यालये वा छात्रजीवने शिक्षायाः समयः अतीवगुरुत्वपूर्णः वर्तते। अस्मिन् समये उत्तमशिक्षामाध्यमेन छात्राणां कृते अन्तर्निहित-शक्तिः समस्तोपयुक्तगुणानां च विकाशः सम्भतः। तस्मात् शिक्षानुष्ठानेषु निर्दिष्टपाठ्यक्रमेण सह नैतिकशिक्षाप्रदानम् अत्यन्तावश्यकमस्ति । एवमपि मूल्यबोध भित्तिक कथाभिनय संगीतादिभिः विभिन्नमाध्यमेन च नीतिशिक्षा प्रदेया इति । अतः कथ्यते-

**"साहित्यसंगीतकलाविहीनः साक्षात्पशुपुछविषाणहीनः।**
**तृर्णं न खादन्नपि जीवमानस्तद्भागधेयं परमं पशूनाम् ।।"**[8]

**चारित्रिकनिर्माणम्**

**"न कश्चित कस्यचित् मित्रं न कश्चित कस्यचित रिपुः।**
**व्यवहारेण जायन्ते मित्राणि रिप्वस्तया ।।"**[9]

प्रथमतया कोमलमतिसम्पन्नाः वालकाः वालिकाश्च सरलनिष्पापरूपेण परिदृश्यमानाः भवन्ति इति। सर्वे एतादृश्या-नैतिकशिक्षया एव प्रभाविताः भवितुं शक्याः । नैतिकशिक्षया अभिभूताः तथा आदर्शपथेन उत्साहिताः छात्रछात्राः अवश्यं स्वकीयकर्त्तव्य-बोधदृढता- आन्तरिकतादिभिः आदर्शराष्ट्रनिर्माणार्थं योग्याः भविष्यन्ति। अस्मिन् विषये पूर्वोक्तयः यथार्थभावेन अनुध्येयाः। प्रसिद्धसाधकेन अरविन्दमहोदयेनोक्तम्- "समग्रजीवनं समग्रप्रकृतिं च दत्ता सर्वथा आध्यात्मिकदिशा एव मानवजातिः स्वतः परं उत्थापयितुं शक्नोति।" तथैव वास्तविकशिक्षामुद्दिश्यं विवेकानन्दमहोदयेनोक्तम्- "अस्माभिः तादृशी शिक्षा प्रयोजनीया, या चारित्रीकनिर्माणं सम्भवति, मनोवलं वृद्धिजायते, बुद्धिश्च सामूहिकविकाशार्थं सर्वविस्तृत भवति । यद्वारा च यः कोऽपि आत्मनिर्भरशीलार्थं सक्षमः भवति। यथार्थेन उक्तम्-

**"यथा चित्तं तथा वाचो यथा वानस्तथा क्रियाः।**
**चित्ते वाचि क्रियायांच साधुनामेक्रूपता।।"**[10]

सम्प्रति एतादृशीं शिक्षां प्रति बहुविदेशिराष्ट्राणाम् तत्परता प्रकाश्यते। तत्रत्य शिक्षाविदः विज्ञानेन वैषयिकज्ञानेन च समृद्धाः सन्तोऽपि यथार्थसुखशान्तितो दूरी तिष्ठन्ति इति अनुभवन्ति । एतदर्थं मानवस्य अन्तर्निहितमानविकमूल्यवोधस्योन्मीलनमेव सर्वादौ अत्यावश्यकम्। तत् यथा-

**"सत्येन रक्ष्यते धर्मो विद्याऽभ्यासेन रक्ष्यते ।**
**मृज्यया रक्ष्यते रूपं कुलं वृत्तेन रक्ष्यते।।"**[11]

सुखस्य विषये यत् एतादृश्या शिक्षया समग्रं विश्वं यदा उपकृतं भवति तदा अस्माकं शिक्षापद्धतेः व्यतिक्रमवशात् अस्माकं शिक्षानुष्ठानेषु इयं शिक्षा न स्थानिता इति । एतदर्थं कथ्यते-

**"अयं निजः परो वेति गणनां लघुचेतसाम्।**
**उदारचरितानां तु वसुधैवकुटुम्बकम्।।"**[12]

मनुष्यः एकः सामाजिकप्राणी भवतीति। सोऽपि श्रेष्ठप्राणिरुपेण विवेचितः भवति। पुरुषानुक्रमेण तस्य समाजे जन्म भवति, जीवनधारण भवति, परिशेषे मृत्युरपि भवति। प्रारम्भे तस्य संस्कारयुक्तम् आदर्शमयजीवनं मार्जितमनुष्यसमाजस्योपरि निर्भरशीलो भवति इति । सर्वेषां मानवानां कृते सच्चरित्ररक्षणं सर्वादौ मुख्यकर्त्तव्यं भवति। यद्वारा स्वमङ्गलेन सह सम्पूर्णदेशस्यापि मङ्गलं सम्भवति इति। केश्चनजनाः विभिन्न सद्गुणपूर्णाः अपि नरित्रहीनाः परिदृश्यन्ते चारित्रिकदोष गुणिनः सकलान् गुणान्

कलुशयति । एतादृशं चरित्रं मनुष्येण संस्कारं विना लब्धुं न शक्यते इति । तत् उक्तम् -

**"विदेशेषु धनं विद्या व्यसनेषु धनं मतिः।**
**परलोके धनं धर्मः शीलं सर्वत्र वैधनम् ॥"**[13]

**भूमिका तथा वर्तमाने उपयोगिता**

अज्ञतां कुसंस्कारं च दूरीकृत्य मानवीचेतनां यथार्थमार्गेण संचालनमेव शिक्षायाः मूलोदेश्यं भवति। एतदर्थं प्राथमिकशिक्षातः प्रारम्भिकपदक्षेपः अवश्यं ग्रहणीयः। उपयुक्तशिक्षायारूपरि निर्भर-शीलो भवति उत्तममानवसमाजः। अतः नैतिकशिक्षा एव आदर्शशिक्षारूपेण निरुपिता भवति। अनया शिक्षया शिक्षार्थी महनीयस्तरं प्राप्नोति। मानवसमाजे बहवः सद्गुणाः दुर्गुणाश्च सन्ति। सत्य-न्याय-सेवा-धार्मिकभावना- शृङ्खलावोध-नियमानुवर्त्तिता-परोपकार-दया-क्षमा-त्याग-तितिक्षा-शान्ति-मैत्री-प्रेमादयः सद्गुणाः सन्ति। नैतिकशिक्षा मानवस्य एतादृशान् गुणानेव जनयितुं सहायिकारूपेण भवति। तत् यथा-

**"येषां न विद्या न तपो न दानं**
**ज्ञातं न शीलं न गुणो न धर्मः**
**ते मर्त्यलोके भुवि भारभूता,**
**मनुष्यरूपेण मृगाश्चरन्ति।।"**[14]

येषां शिक्षा (विद्या), तपः (आत्मसंयम) दान (दान) प्रज्ञा, सिल (गुण), गुण, धर्म (धर्म) (धर्म) च अभावः सन्ति, ते अस्याः पृथिव्यां (भारभूत) भारः भवन्ति। एतादृशाः जनाः मनुष्यरूपेण अपि वस्तुतः पशवः (मृग/पशवः) इव पृथिव्यां भ्रमन्ति। कथ्यते यथा-

**"विद्या ददाति विनयं विनयाद्याति पात्रताम्।**
**पात्रत्वाद् धनमाप्नोति धनाद् धर्मं ततः सुखम्।।"**[15]

ज्ञानम् अनुशासनं प्रददाति, अनुशासनात् सामर्थ्यं, सामर्थ्यात् धनं, धनात् सत्कर्म धर्मश्च परिणामः भवति, सत्धर्मं कृत्वा अस्माकं सुखं (सन्तुष्टिः/सुखं) भवति। परमं सुखं धर्मस्य (सद्कर्म) अभ्यासेन, ज्ञानात् आरभ्य, विनयेन, सामर्थ्येन च धनं अर्जयित्वा प्राप्यते। पराधीनभारतवर्षे आङ्गलजनानाम् आवश्यकतानुसारं या शिक्षानीतिः प्रारब्धा आसीत्, शिक्षाक्षेत्रे अद्यापि सैव अनुसृता। अधुनाशिक्षाक्षेत्रे चलितशिक्षाप्रविधौ चरित्रगठनस्य आदर्शवादस्य चोपरि महत्वं नास्ति। शिक्षानितिः जातियता-शिष्टता- स्वदेश-प्रीत्यादिविषये भावनायारुद्रेकार्थं जागरणार्थं च सम्पूर्णरुपेण अक्षमा भवति।

**सारांशः**

स्वकीयपरिवारेऽपि चरित्रगठनस्य प्रयोजनीयता अस्ति इति। चारित्रिकसंस्कारं विना यथार्थभावेन परिवारस्य देशस्य वा प्रगतिः न सम्भवति। अतैव स्वकीययोः पित्रोरूपरि प्रथमतः सन्तानस्य चरित्रगठनं निर्भरंकरीति । यथा एकस्मिन् परिवारे जातस्य शिशोः यादृशं वैशिष्ट्यं परिलक्ष्यते तथा परस्मिन् इतरपरिवारे जातस्य शिशोः तद्वैशिष्ट्यं च परिदृश्यते। तादृशं चरित्रसंसर्गात् इति व्युत्पन्नानां गुत्पत्तिः परिलक्ष्यते । यतः सकलसद्गुणसम्पन्नोऽपि जनः कदाचित् हीनचरित्र पुरुषः सम्पर्केण नष्टचरित्रः सन् मार्गभ्रष्टो भवति इति। मनुस्मृत्तेः उक्तम्-

**"वृत्तं यत्नेन संरक्षेद् वित्तमेति च याति च ।**
**अक्षीणो वित्ततः क्षीणो वृत्ततस्तु हतो हतः।।"**[16]

एको ही दोषः गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवाङ्कः " इति कालिदासवचनानुसारेण एकोऽपि चारित्रिकदोषः उत्तमगुणसम्पूर्णं कलङ्कयति एव । अतैव साधूक्तं तत् यथा-

**"आचाराल्लभते ह्यायुः आचारादीप्सिताः प्रजाः।**
**आचाराद्धनमक्ष्यम् आचारो हन्त्यलक्षणम्।।"**[17]

सम्प्रति समग्रपृथिव्यामपि चारित्रिकसंस्कारस्य स्खलनहेतोः दुर्नीतिभ्रष्टाचारादयः परिदृश्यन्ते । विशेषतः ये राष्ट्रनेतारः सन्ति तेषां जीवनशैली यथार्थत्वेन न निर्मिता भवति। अस्मिन् प्रसङ्गे सर्वैरेतद् ज्ञातव्यम् यत् -

**"राज्ञि धर्मिणि धर्मिष्ठाः पापे पापाः समे समाः ।**
**लोकास्तमनुवर्त्तन्ते यथा राजा तथा प्रजाः।।"**[18]
**"यत्र राजा स्वयं चौरः सामान्यः सपुरोहितः ।**
**तत्राहं किं करिष्यामि यथा राजा तथा प्रजाः ॥"**[19]

तस्मात् कारणात् प्रजानां हितार्थं मर्यादापुरुषोत्तमः श्रीरामचन्द्रः सकलसद्गुणविभूषितोऽपि स्वकीयां वंशपरम्परां न विस्मृतवान्। स्वस्य यशः अपि निरस्य इतरवाक्येन स्वकीयां लक्ष्मीरूपिणीं भार्यां जानकीमपि कलुसितचरित्रामिति भ्रान्त्या वने त्यक्तवान् इति। सद्चरित्रसंस्कारमाश्रित्य मानवजीवनस्य सामग्रिकविकाशः सम्भव-ति। वचनमस्ति-

**"नयस्य विनयो मूलं विनयः शास्त्रनिश्चयः।**
**विनयो हीन्द्रियजयः तद्युक्तः शास्त्रमृछति।।"**[20]

**सन्दर्भाः**

1- कपिलः
2-सुभाषितानि / नीतिपरक साहित्य
3- विदुरनीति
4- महाभारत-अनुशासनपर्व (श्लोक-116/117)
5- संस्कृतसुभाषितम्
6- नाणक्यनीति
7- संस्कृतसुभाषितम्
8-भर्तृहरि- नीतिशतकम्
9- हितोपदेश / चाणक्यनीति
10- भसंस्कृतसुभाषितम्
11- चाणक्यनीति (अध्याय-15, श्लोक-16)
12- महोपनिषद (अध्याय-6, श्लोक-71-72)
13- संस्कृतसुभाषितम्
14- भर्तृहरि-नीतिशतकम् (श्लोक-12)
15-भगवतगीता-(पञ्चमाध्याय-18/20)
16- मनुस्मृति (अध्याय-4, श्लोक-171)
17- महाभारत, अनुशासनूपूर्व
18- चाणक्यनीति
19- चाणक्यनीति
20- सुभाषितसुधानिधि

**सन्दर्भग्रन्थसूची**

1- डॉ.सोमनाथ साहु-शिक्षायाः दार्शनिकाधाराः, आयुर्वेद संस्कृत हिन्दी पुस्तक भण्डार, झालानियों का रास्ता, किशनपोल बाजार, जयपुर-302001, (राजस्थान)
2-स्नेहलता मिश्रः- शैक्षिकप्रविधिः, तिरतरङ्ग प्रिण्टर्स आण्ड् पब्लिके-सन,बि.-30,चन्दकाशिल्पाञ्चल,पो.-किट्,भुबनेश्वर-24, 2012
3- प्रो.गोपीनाथ शर्मा- शिक्षायाः औचित्यम्
4-आचार्य नारायण शर्मा, मुशीराम मनोहर लाल- सुभाषितरत्नभाण्डागार, दिल्ली, 1978
5- श्रीमती गोदावरी घिल्डयाल- समकालीन भारतीय समाज एवं संस्कृति, भारतीय प्राच्यविद्या शोध संस्थान, वाराणसी, 1997